# શ્રીવેઙ્કટેશમઙ્ગલાષ્ટકમ્ ૨

Shri Venkatesha Mangalashtakam 2

sanskritdocuments.org

January 1, 2018

# Shri Venkatesha Mangalashtakam 2

# શ્રીવેઙ્કટેશમઙ્ગલાષ્ટકમ્ ૨

## Sanskrit Document Information

Text title : venkaTeshamangalAShTakam 2

File name : venkaTeshamangalAShTakam2.itx

Category : vishhnu, venkateshwara, vAdirAja, aShTaka

Location : doc_vishhnu

Author : Vadiraja

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Latest update : January 1, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

January 1, 2018

*sanskritdocuments.org*

Shri Venkatesha Mangalashtakam 2

# શ્રીવેઙ્કટેશમઙ્ગલાષ્ટકમ્ ૨

જમ્બૂદ્વીપગશેષશૈલભુવનઃ શ્રીજાનિરાદ્યાત્મજઃ
    તાર્ક્ષ્યાહીશમુખાસનસ્ત્રિભુવનસ્થાશેષલોકપ્રિયઃ
શ્રીમત્સ્વામિસરઃસુવર્ણમુખરીસંવેષ્ટિતઃ સર્વદા
    શ્રીમદ્વેઙ્કટભૂપતિર્મમ સુખં દદ્યાત્ સદા મઙ્ગલમ્ ॥ ૧॥

સન્તપ્તામલજાતરૂપરચિતાગારે નિવિષ્ટઃ સદા
    સ્વર્ગદ્વારકવાટતોરણયુતઃ પ્રાકારસપ્તાન્વિતઃ ।
ભાસ્વત્કાઞ્ચનતુઙ્ગચારુગરુડસ્તમ્ભે પતત્પ્રાણિનાં
    સ્વપ્ને વક્તિ હિતાહિતં સુકરુણો દદ્યાત્ સદા મઙ્ગલમ્ ॥ ૨॥

અત્યુચ્ચાદ્રિવિચિત્રગોપુરગણૈઃ પૂર્ણૈઃ સુવર્ણાચલૈઃ
    વિસ્તીર્ણામલમણ્ટપાયુતયુતૈર્નાનાવનૈર્નિર્ભયૈઃ ।
પઞ્ચાસ્યેભવરાહખડ્ગમૃગશાર્દૂલાદિભિઃ શ્રીપતિઃ
    નિત્યં વેદપરાયણસુકૃતિનાં દદ્યાત્ સદા મઙ્ગલમ્ ॥ ૩॥

ભેરીમઙ્ગલતુર્યગોમુખમૃદઙ્ગાદિસ્વનૈઃ શોભિતે
    તન્ત્રીવેણુસુઘોષશૃઙ્ગકલહૈઃ શબ્દૈશ્ચ દિવ્યૈર્નિજૈઃ ।
ગન્ધર્વાપ્સરકિન્નરોરગનૃભિર્નૃત્યદ્ભિરાસેવ્યતે
    નાનાવાહનગઃ સમસ્તફલદો દદ્યાત્ સદા મઙ્ગલમ્ ॥ ૪॥

યઃ શ્રીભાર્ગવવાસરે નિયમતઃ કસ્તૂરિકારેણુભિઃ
    શ્રીમત્કુઙ્કુમકેસરામલયુતઃ કર્પૂરમુખ્યૈર્જલૈઃ ।
સ્નાતઃ પુણ્યસુકઞ્ચુકેન વિલસત્કાઞ્ચીકિરીટાદિભિઃ
    નાનાભૂષણપૂગશોભિતતનુર્દદ્યાત્ સદા મઙ્ગલમ્ ॥ ૫ ॥

તીર્થં પાણ્ડવનામકં શુભકરં ત્વાકાશગઙ્ગા પરા
    ઇત્યાદીનિ સુપુણ્યરાશિજનકાન્યાયોજનૈઃ સર્વદા ।
તીર્થં તુમ્બુરુનામકં ત્વઘહરં ધારા કુમારાભિધા
    નિત્યાનન્દનિધિર્મહીધરવરો દદ્યાત્ સદા મઙ્ગલમ્ ॥ ૬॥

આર્તાનામતિદુસ્તરામયગણૈર્જન્માન્તરાઘૈરપિ
    સઙ્કલ્પાત્ પરિશોધ્ય રક્ષતિ નિજસ્થાનં સદા ગચ્છતામ્ ।
માર્ગે નિર્ભયતઃ સ્વનામગૃણતો ગીતાદિભિઃ સર્વદા
    નિત્યં શાસ્ત્રપરાયણૈઃ સુકૃતિનાં દદ્યાત્ સદા મઙ્ગલમ્ ॥ ૭॥

નિત્યં બ્રાહ્મણપુણ્યવર્યવનિતાપૂજાસમારાધનૈરત્નૈઃ
    પાયસભક્ષ્યભોજ્યસુઘૃતક્ષીરાદિભિઃ સર્વદા ।
નિત્યં દાનતપઃપુરાણપઠનૈરારાધિતે વેઙ્કટક્ષેત્રે
    નન્દસુપૂર્ણચિત્રમહિમા દદ્યાત્ સદા મઙ્ગલમ્ ॥ ૮॥

ઇત્યેતદ્વરમઙ્ગલાષ્ટકમિદં શ્રીવાદિરાજેશ્વરૈ-
    રાખ્યાતં જગતામભીષ્ટફલદં સર્વાશુભધ્વંસનમ્ ।
માઙ્ગલ્યં સકલાર્થદં શુભકરં વૈવાહિકાદિસ્થલે
    તેષાં મઙ્ગલશંસતાં સુમનસાં દદ્યાત્ સદા મઙ્ગલમ્ ॥ ૯॥

॥ ઇતિ શ્રીવાદિરાજતીર્થશ્રીચરણકૃતં શ્રીવેઙ્કટેશમઙ્ગલાષ્ટકમ્ ॥

Encoded and proofread by
Malleswara Rao Yellapragada malleswararaoy at yahoo.com

---

*Shri Venkatesha Mangalashtakam 2*
pdf was typeset on January 1, 2018

Please send corrections to *sanskrit@cheerful.com*